# राष्ट्रियसमरसताया :संस्थापका जगद्गुरव: स्वामिनो रामानन्दाचार्या:

**अंजना शर्मा**
शोधार्थी, संस्कृत विभाग, राजस्थान विश्वविद्यालय, जयपुर

चतुर्दश शताब्द्या समयो भारतवर्षाय अत्यन्तं भयावह आसीत्। हिन्दुसमाजो मानवकल्पितेषु भेदभावेषु विभक्त आसीत्। अपि च, तात्कालिकैः विधर्मिशासकैः स्वकीयैः प्रबलैरत्याचारै राष्ट्रं समाजं च विच्छन्ने कृते आस्ताम्। कश्चिदपि कस्यापि सहायतां कर्त्तुं समर्थो नासीत्। 'जजिया' करस्य माध्यमेन हिन्दुजनतायां अत्याचारमया विधयः प्रसारिताः। ताश्च मौनं धृत्वा असहाया प्रजा सोढुं तत्परा अभवन्। मानवता दानवताया अभिमुखं निस्सहाया भूत्वा रोरुद्यमाना आसीत्। सत्पुरुषा ईश्वरमेव भजन्तः तत्प्रतिकारं कामयन्ते स्म। एतादतिरिक्तं किमपि अन्यत् उपायं ते न पश्यन्ति स्म, अतएव किंकर्त्तव्यविमूढा दुःखिनश्चासन्।

मिथ्याप्रवादिनाम् अत्याचारिणां भ्रष्टाचारिणां दुराचारिणां शासकानां विनाशस्य द्वौ उपायौ तदानीन्तनायां स्थितौ लक्ष्यमाणौ आस्ताम्। तत्र प्रथमस्त्वयं यत् राष्ट्रियमैक्यं प्रदर्श्य एतान् पदभ्रष्टान् कुर्युः, द्वितीयश्चायं यत् कस्यचित् महापुरुषस्य नेतृत्वं प्राप्नुयात्, यो हि एतान् विदलयितुं जनतां संघटितां कुर्यात्। एतादृशे विषमपरिस्थितिमये काले श्रीमतां पुण्यसदनशर्मणां पुत्ररूपेण भगवतो रामानन्दस्य जन्म अभवत्। रामानन्दस्य जन्मस्थानं प्रयाग आसीत्। रामानन्दस्य अवतरणेन तीर्थराजः प्रयागोऽपि धन्यो बभूव। वाल्मीकिसंहितायां रामानन्दस्य जन्मोद्देश्यं लिखितमस्ति-

**''रामानन्दो यतिर्भूत्वा तीर्थराजे च पावने।**
**अवतीर्य जगन्नाथो धर्मं स्थापतये पुनः।।**[1]

वैश्वानर संहितायां रामानन्दस्य जन्मसमयस्थितिर्वर्णिता। तत्र तिथिनक्षत्रलग्नकरणयोगादीनामप्युल्लेखो विहितः। यथा-

**'माघे च कृष्णसप्तम्यां चित्रानक्षत्रसंयुते।**
**कुम्भलग्ने सिद्धियोगे सुसप्तदण्डगे रवौ।।**

**रामानन्दः स्वयं रामः प्रादुर्भूतो महीतले।'**[2]

भगवतो रामानन्दाचार्यस्य प्राकट्ये संजाते भारतवर्षस्य हिन्दुधर्मानुयायिनः प्रासीदन् तेषां मुखमण्डले अभूतपूर्वं तेजः समचरत्। सर्वेषां जीवने शौर्यं लक्ष्यमाणम् अभवत्। सर्वत्र रामानन्दस्य जयजयकारः समभवत्। तीर्थराजस्य प्रयागस्य साधवोऽपि परमप्रसन्नेन मनसा प्रभोः श्रीरामानन्दस्य दर्शनार्थं प्रयाताः। तैः भगवतो रामानन्दस्य स्तवनं कृतवन्तः। संत श्रीरामकुमारदासमहोदयैरस्य स्तवनस्योल्लेखो निम्नानुसारं विहितः-

**'प्रगट्या प्रयागराज रामान्द स्वामी। जयजयकार भयो आज रामानन्द स्वामी।।**

**माता सुशीला ना बालक थइ आविया। धर्मनी रक्षाने काज रामानन्द स्वामी।।**

**पुण्यसदन नूँ है यूँ हरखाय के। मिल्यो जीवे परमानन्द आज रामानन्द स्वामी।।**

**आचारज राघवानन्दजी नी पासें। लीधो छे मन्त्रराज रामानन्द स्वामी।।**

**वैदिकधर्म नो ध्वज फहरायो। करियो आनन्दभाष्य रामानन्द स्वामी।।**

**बिनवे विरक्त एवा महाप्रभु ने। देश नी राखी लाज रामानन्द स्वामी।।'**[3]

बाल्ये वयस्येव रामानन्दः वेदशास्त्रपारंगतः संजातः। विद्याकालं समाप्य रामानन्दः पितृभ्यां संन्यासस्याज्ञामयाचत। आपि च अवदत्- अहं अस्य राष्ट्रस्य अत्रत्यप्रजायाश्च दुःखापहाराय पृथिव्यामवतीर्णोऽस्मि। मां विरक्तं वैष्णवं भवितुमाज्ञापयन्तु। रामानन्दस्य हठं दृष्ट्वा तत्पितरौ रामानन्दं काश्यां नीत्वा पंचगंगाघाट स्थाने विराजमानानां तात्कालिकवैष्णवाचार्यप्रमुखानां धीमतां श्रीमतां जगद्गुरुराघवानन्दाचार्यणां समीपं गतवन्तौ। स्वामिनो राघवानन्दाः रामानन्दं शिष्यरूपेण सम्प्राप्यातीव हृष्टा अभूवन्। अनेकेषां सूाधनां सत्पुरुषाणां विदुषां चोपस्थितौ राघवानन्दाचार्याः रामानन्दं वैष्णवसम्प्रदाये दीक्षितं कृतवान्। दीक्षासंस्कारं कृत्वा श्रीराममन्त्रं च प्रदाय रामानन्दाचार्य इत्यभिधानमपि कृतवान्। दीक्षागुरोः राघवानन्दाचार्यात् आज्ञां प्राप्य स्वामी रामानन्दः रामभक्तिप्रसाराय भारतवर्षस्य दिग्विजययात्रायै प्रस्थानं चकार।[4]

## दिग्विजययात्रा

आचार्यपदे प्रतिष्ठिताः स्वामिरामानन्दाचार्याः वैदिकधर्मविरोधिमिः सह शास्त्रार्थं सम्पाद्य तान् परास्तान् विधाय

धर्मविजयं कृतवन्तः। तत्रभवद्भिः पञ्चमकारवादिकौलाचार्यं दुर्जनानन्दं पाखण्डिनं स्ववैदुष्येण परास्तं कृत्वा सनातनर्धस्य पुनरुद्धारं कृतवान्। तदानीन्तने काले यावन्तोऽपि सनातनधर्मविरोधिनः आसन् ते सर्वे आत्मपराजयं स्वीकृत्य श्रीमतां जगद्गुरुवर्याणां रामानन्दाचार्याणां शरणं लब्धवन्तः।

स्वदिग्विजययात्रायां यदा स्वामी रामानन्दः रंगनाथधाम्नि पदार्पणं कृतवान्, तदा द्वादश शिष्याः तैः सह आसन्। तदानीं जातिवादस्य दुर्भावनाग्रस्तैः कैश्चिद् द्विजैः तेन क्रियमाणस्य मन्दिरप्रवेशस्य विरोधः कृतः। तत्रभवता आज्ञापितं यत् अहं भारतीयसमाजस्य संघटनं कृत्वा धर्मस्य रक्षणं कृत्वा अस्य राष्ट्रस्य कल्याणायैव भूमण्डले समागतोऽस्मि। भवन्तः सर्वे कुत्सितं कृत्यं विहाय सन्मार्गं चलन्तु। स्वीयं मिथ्याभिमानं त्यक्त्वा ज्ञानिनां मार्गं गृहीत्वा च आचरन्तु। अनेन भवद्भिरपि भगवद्दर्शनं करिष्यते।[5]

स्वामिनो रामानन्दस्य वचांसि श्रुत्वा ते किञ्चित्कालं तु स्तब्धतां ययुः, किन्तु तत्क्षणमेव भगवत्कृपया ज्ञानज्योतिःप्रवेशात् निर्गलिताभिमानाः तच्चरणशरणमाश्रयाणाः द्वादशमहाभागवतानां दिव्यदर्शनस्यापि लाभं प्राप्तवन्तः। तत्पश्चात् जगद्गुरुरामानन्दाचार्याः सानन्दं तानुपदिष्टवान्। तैः ईश्वरभक्तिकार्ये सर्वेषां मनुष्याणामधिकारं प्रतिष्ठापितवान्। वैष्णमताब्जभास्करे तदीयोपदेशामृतान्तर्गतमस्य विशेषेणोल्लेखोऽस्ति -

**''सर्वे प्रपत्तेरधिकारिणो मताः**
**शक्ता अशक्ता पदयोर्जगप्रभोः।**
**नापेक्षते तत्र कुलं बलं च नो**
**न चापि कालो न हि शुद्धतापि वै।।**[6]**''**

भगवद्भिःरामानन्दाचार्यैः कृतो वैष्णवमताब्जभास्कर इत्याख्यो ग्रन्थो भक्तिसिद्धान्तस्य अमूल्यो निधिरस्ति। वैष्णवानां कृते त्विदम् अमृततुल्यम् अस्ति। आचार्यचरणैस्तैः प्रस्थानत्रयीमधिकृत्यापि भाष्यं लिखितम्। भक्ति-आन्दोलनेन आभिजात्य-वैजात्यदुर्भावना विनष्टा। दीनहीनानां मलिनानां जनानामद्धारो विहितः। मानवकृतान्नम्मूलकभेदभावान्निर्मूलान् विधाय सामाजिकसमरसतायाः स्थापना कृता। भारतीयान् एकसूत्रतायामाबद्धान् कृत्वा हिन्दुधर्मस्य जयघोषः कृतः।

जगद्गुरुवर्याणां श्रीमतां रामानन्दाचार्याणां परीक्षणाय व्यर्थशास्त्रार्थमुद्दिश्य तैमूरलंगसदृशा अनेके विधर्मिणः समायाताः, किन्तु स्वामिवर्याणां शरणं गृहीत्वा उपकृता अभूवन्। तत्रभवद्भिः तात्कालिकमुगलसर्वकारेण स्थापितं

'जजियाकर' नामकं करविशेषं अनुचितं प्रतिपाद्य तदपहारः कारितः।[7] डॉ. एस. राधाकृष्णन् महोदयैरप्युल्लिखितम् यत् चतुर्दशशताब्द्यां स्वामिरामानन्दाचार्याः अभूतपूर्वाः सन्तशिरोमणय आसन्, यैः मानवताया उन्नयनं कृत्वा भगवद्भक्तेः मार्गः सर्वेभ्यः प्रशस्तीकृतः।[८]

**श्रीमतां रामानन्दाचार्याणान्तु उद्घोष एवासीत्-**

**'ब्राह्मणाः क्षत्रियाः वैश्याः स्त्रियः शूद्रास्तथेतरे।**

**मन्त्राधिकारिणः सर्वे ह्यनन्यशरणा यदि।।[९]'**

एवं श्रीरामानन्दाचार्याणां जीवनं भारतीयजनोद्धाराय भारतीयसमाजोद्धाराय भारतराष्ट्रोद्धाराय चाद्यापि स्मर्यते। वर्तमाने भारतीयजनमानसं विकृतं संजातं भारतीयसमाजेऽपि विघटनपरत्वं दृश्यते, भारतराष्ट्रं चापि विविधसंकटाकीर्णं वर्तते, अतएव अद्यापि स्वामिरामानन्दाचार्यप्रणीतानां सिद्धान्तानां शिक्षाणां च अध्ययनानुपालनयोर्महती आवश्यकताऽस्ति।

**सन्दर्भः**

1. वाल्मीकिसंहित - 138
2. वैश्वनासंहिता - 3/61
3. जीवनीरामानन्दनीं / पृ. 17
4. रामानन्ददिग्दर्शन / पृ. 10
5. वैष्णव भक्तिधाराः रामानन्दसम्प्रदाय / पृ.88
6. वैष्णवमताभास्कर - पृ.203
7. स्वामीरामानन्द - (संगमपाण्डेयो) पृ. 188
8. भारतीय संस्कृति एवं वैष्णवधर्म / पृ. 138 - 139
9. हारीतस्मृति - 2/216